## ॥ अष्टमोऽध्यायः ॥

ध्यानं
ॐ अरुणां करुणा तरङ्गिताक्षीं धृत पाशाङ्कुश बाणचाप हस्ताम् ।
अणिमाधिभि रावृतां मयूखैर् अहमित्येव विभावये भवानीम् ॥

ॐ ऋषिरुवाच ॥ १॥
चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २॥

ततः कोप पराधीन चेताः शुम्भः प्रतापवान् ।
उद्योगं सर्व सैन्यानां दैत्याना मादिदेश ह ॥ ३॥

अद्य सर्वबलै र्दैत्याः षडशीति रुदायुधाः ।
कम्बूनां चतुरशीतिर् निर्यान्तु स्वबलैर्वृताः ॥ ४॥

कोटिवीर्याणि पञ्चाशत् असुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५॥

कालका दौर्हृदा मौर्याः कालिकेया स्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥ ६॥

इत्याज्ञाप्या सुरपतिः शुम्भो भैरव शासनः ।
निर्जगाम महासैन्य सहस्रै र्बहुभिर्वृतः ॥ ७॥

आयान्तं चण्डिका दृष्ट्वा तत्सैन्य मतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणी गगनान्तरम् ॥ ८॥

ततः सिंहो महानादं अतीव कृतवान्नृप ।
घण्टास्वनेन तन्नादं अम्बिका चोपबृंहयत् ॥ ९॥

धनुर्ज्या सिंह घण्टानां नादापूरित दिङ्मुखा ।
निनादै र्भीषणैः काली जिग्ये विस्तारितानना ॥ १०॥

तं निनाद मुपश्रुत्य दैत्यसैन्यैश् चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥ ११॥

एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामर सिंहानां अतिवीर्य बलान्विताः ॥ १२॥

ब्रह्मेश गुह विष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३॥

यस्य देवस्य यद्रूपं यथा भूषण वाहनम् ।
तद्वदेव हि तच्छक्तिर् असुरान्योद्धु माययौ ॥ १४॥

हंसयुक्त विमानाग्रे साक्ष सूत्र कमण्डलुः ।
आयाता ब्रह्मणः शक्तिर् ब्रह्माणी साभिधीयते ॥ १५॥

माहेश्वरी वृषारूढा त्रिशूल वर धारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखा विभूषणा ॥ १६॥

कौमारी शक्ति हस्ता च मयूर वर वाहना ।
योद्धु मभ्याययौ दैत्यान् अम्बिका गुहरूपिणी ॥ १७॥

तथैव वैष्णवी शक्तिर् गरुडोपरि संस्थिता ।
शङ्ख चक्र गदा शार्ङ्ग खड्ग हस्ताभ्युपाययौ ॥ १८॥

यज्ञवाराह मतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥ १९॥

नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेप क्षिप्त नक्षत्र संहतिः ॥ २०॥

वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्र नयना यथा शक्रस्तथैव सा ॥ २१॥

ततः परिवृत स्ताभिर् ईशानो देव शक्तिभिः ।
हन्यन्ता मसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २२॥

ततो देवी शरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्ति रत्युग्रा शिवाशत निनादिनी ॥ २३॥

सा चाह धूम्र जटिलं ईशान मपराजिता ।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भ निशुम्भयोः ॥ २४॥

ब्रूहि शुम्भं निशुम्भं च दानवा वतिगर्वितौ ।

ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५॥

त्रैलोक्य मिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितु मिच्छथ ॥ २६॥

बलावले पादथ चेत् भवन्तो युद्ध काङ्क्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २७॥

यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस् ततः सा ख्याति मागता ॥ २८॥

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर् यत्र कात्यायनी स्थिता ॥ २९॥

ततः प्रथममे वाग्रे शर शक्त्यृष्टि वृष्टिभिः ।
ववर्षु रुद्धतामर्षास् तां देवी ममरारयः ॥ ३०॥

सा च तान् प्रहितान् बाणाञ्छूल शक्ति परश्वधान् ।
चिच्छेद लीलयाध्मात धनु र्मुक्तै र्महेषुभिः ॥ ३१॥

तस्याग्रतस्तथा काली शूलपात विदारितान् ।
खट्वाङ्ग पोथितांश्चारीन् कुर्वती व्यचरत्तदा ॥ ३२॥

कमण्डलु जलाक्षेप हतवीर्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥ ३३॥

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्याति कोपना ॥ ३४॥

ऐन्द्री कुलिश पातेन शतशो दैत्य दानवाः ।
पेतु र्विदारिताः पृथ्व्यां रुधिरौघ प्रवर्षिणः ॥ ३५॥

तुण्ड प्रहार विध्वस्ता दंष्ट्राग्रक्षत वक्षसः ।
वाराह मूर्त्या न्यपतंश् चक्रेण च विदारिताः ॥ ३६॥

नखै र्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।
नारसिंही चचाराजौ नादापूर्ण दिगम्बरा ॥ ३७॥

चण्डाट्टहासै रसुराः शिवदूत्यभि दूषिताः ।
पेतुः पृथिव्यां पतितांस् तांश्च खादाथ सा तदा ॥ ३८॥

इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।
दृष्ट्वाभ्युपायै र्विविधैर् नेशु र्देवारि सैनिकाः ॥ ३९॥

पलायन परान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ।
योद्धु मभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४०॥

रक्तबिन्दु र्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यां तत्प्रमाणस् तदासुरः ॥ ४१॥

युयुधे स गदा पाणिर् इन्द्र शक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीज मताडयत् ॥ ४२॥

कुलिशे नाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थु स्ततो योधास् तद्रूपास्तत्पराक्रमाः ॥ ४३॥

यावन्तः पतिता स्तस्य शरीराद्रक्त बिन्दवः ।
तावन्तः पुरुषा जातास् तद्वीर्य बल विक्रमाः ॥ ४४॥

ते चापि युयुधु स्तत्र पुरुषा रक्त सम्भवाः ।
समं मातृभि रत्युग्र शस्त्र पातातिं भीषणम् ॥ ४५॥

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास् ततो जाताः सहस्रशः ॥ ४६॥

वैष्णवी समरे चैनं चक्रेणाभि जघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥ ४७॥

वैष्णवी चक्र भिन्नस्य रुधिरस्राव सम्भवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणै र्महासुरैः ॥ ४८॥

शक्त्या जघान कौमारी वाराही च तथासिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥ ४९॥

स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ।
मातृः कोप समाविष्टो रक्तबीजो महासुरः ॥ ५०॥

तस्याहतस्य बहुधा शक्ति शूलादिभि र्भुवि ।

पपात यो वै रक्तौघस् तेनासञ्छतशोऽसुराः ॥ ५१॥

तैश्चासुरा सृक्सम्भूतैर् असुरैः सकलं जगत् ।
व्याप्त मासीत्ततो देवा भयमाजग्मु रुत्तमम् ॥ ५२॥

तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ॥ ५३॥

मच्छस्त्र पात सम्भूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥ ५४॥

भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५५॥

भक्ष्यमाणा स्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभि जघान तम् ॥ ५६॥

मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
ततोऽसावा जघानाथ गदया तत्र चण्डिकाम् ॥ ५७॥

न चास्या वेदनां चक्रे गदा पातोऽल्पि कामपि ।
तस्याह तस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५८॥

यतस्ततस्तद्व क्त्रेण चामुण्डा सम्प्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥ ५९॥

तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम् ।
देवी शूलेन वज्रेण बाणै रसिभिर्ऋष्टिभिः ॥ ६०॥

जघान रक्तबीजं तं चामुण्डा पीत शोणितम् ।
स पपात महीपृष्ठे शस्त्र सङ्घ समाहतः ॥ ६१॥

नीरक्तश्च महीपाल रक्तबीजो महासुरः ।
ततस्ते हर्षमतुलं अवापुस्त्रिदशा नृप ॥ ६२॥

तेषां मातृगणो जातो ननर्ता सृङ्ग्दोद्धतः ॥ ६३॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीज वधो नामाष्टमोऽध्यायः ॥ ८॥